ऋदन्तात्परस्या सबुद्धेर्डित्[5] अर इति तु[6] भवति नाम्नि सञ्ज्ञाया विषये । हे पिअर । ड ऋदन्तादिति डादेशे । हे पिअ । आ सो वेत्याकारादेशे[7] सोलुकि[8] । हे पिआ । वाऊलकाड्डादेशडरमादेशयोरा सो वेत्येतन्न प्रवर्तते । प्रवृत्तौ त्वात्त्वकरणसामर्थ्यात्टिलोपाभावे[10] एकप दत्वात्सध्यभावे[11] च पिआस पिआअर इत्यनिष्टरूपप्रसङ्ग । सर्वाभा वपक्षे सञ्ज्ञायामर इत्यरादेशे[1] डोसुकौ तु सबुद्धेरिति[13] विकल्पप्रवृत्तौ ।

---

[1] T places this word before भत्तणो R om this word
[2] iv, 66 [4] iv, 6 [5] iv 7 [6] ii 3 [7] iv 68 [8] iv, 66
[9] iv, 6 [10] iv, 7 [11] iii 2 [1] iv 69 [13] iv 10

हे पिअरो। हे पिअर। अत्र यथादर्शनं सर्वेषामपुकारमाश्रित्यार्थादुद्धृतां त्वत्सामभीत्यत्र[1] च्छतामिति षष्ठवचनात् असश्चसङसिङसटाभिस्भ्यस् सुप्सु[2]। पिउणो। पिउणा। पिअहि। पिअसु। इत्यादि तत्तच्छब्दवद्रूपमूह्यम्॥

इत्यजन्ता पुल्लिङ्गा परिसमाप्ता[3]॥

Fifth Section

अथाजन्ता स्त्रीलिङ्गा उच्यन्ते॥

प्रथम इति स्थिते।

He ii 75 **अण्णसहहूहण्णा एह[4]॥ १॥**

अ ण्ण स ह ह्ल ण्ण इत्येतेषां एहादेशो भवति।

He i 35 **स्त्रियामिमाअलिंगा॥ २॥**

इमाना अअल्यादयश्च शब्दा स्त्रीलिङ्गे वा प्रयोक्तव्या। इति स्त्रीलिङ्गतायां टाप्[5]। बहुलाधिकारादेकवदेऽपि[6] नित्य मवर्णदोष[7]। सोलुक्[8]। पएहा। असश्चसो।

He iii, 2[9] **शेशू[10] स्त्रिया तु॥ ३॥**

स्त्रीलिङ्गात्परौ अस्शसौ शिदोत्त्वमुत्त्व च लाप्येते[11]। शित्त्वमिका रोकारान्तादेशम्[12]। पएहाओ। पएहाउ। पए सुक्[13]। पएहा। सवुहो।

He iii 41 **टामो डे॥ ४॥**

टावन्तात्परस्या सवुद्धेर्डिदेत्त्व[14] तु[15] भवति। हे पएहे। पए सोर्लुक्[16]। हे पएहा। अमि। अम इति[17] मकारो बिन्दुरिति[18] बिन्दुत्व[19]।

He iii 46 **स्वरस्य बिन्दमि॥ ५॥**

बिन्दौ अमि च परे स्वरस्य ह्रस्वो भवति। अम इति[17] मकारादेशस्य बिन्दुरिति[18] बिन्दुभावादम उपादान बिन्दाविवेव सिद्धे[20] बाहुल्ल कमयुक्तं ह्रस्वस्य क्वचित्कमपि पाक्षिकत्वममि परे न क्वचिदपि मा भूदिति। पएह। तृतीयाषष्ठीसप्तमीचतुर्थैकवचनेषु[21]।

---

[1] IV, 67 [2] R om भ्यस् [3] T om this word
[4] Pā IV, 1 4 [5] III 1 and 2 [6] Pā VI, 1, 101 [7] IV 6
[8] शीशु Tri [9] T om तु II, 3 [10] II, 5 [11] IV 9 [12] IV, 7
[13] II 3 [14] IV 6 [15] IV, 11 [16] III 10 [17] R om च
[18] IV 11 [19] III, 10 [20] R adds अमोऽप्युपादान [21] °षष्ठैक° R.

टाडिडसाम् ॥ ६ ॥ Hs III 29

स्त्रीलिङ्गात्परेषां टा ङि ङस् इत्येतेषां स्थाने शित[1] अ आ इ ए इत्यादेशा भवन्ति। इति चतुर्ष्वपि प्राप्तेषु।

नातश्शा ॥ ७ ॥ Hs III, 30

स्त्रीलिङ्गादाकारान्तात्परेषां ङसिटाडिङसां शात्व न भवति। पण्हाअ। पण्हाइ। पण्हाए। ङसौ। स्त्रियामिति वर्तमाने।

ङसेश्शशाशिशे ॥ ८ ॥ Hs III, 29

स्त्रीलिङ्गात्परस्य ङसे शितश्चत्वार[1] अ आ इ ए इत्यादेशासु[2] भवन्ति। नातश्चेति[3] शादेशस्य प्रतिषेध। पण्हाअ। पण्हाइ। पण्हाए। पण्हा हितो। इत्यादि। अनुक्तमन्यशब्दानुशासनवदिति[4] प्राप्तो[5] याद[6] चाङ्गलकान्न भवति। एवमन्यत्रापि प्राप्तस्य निवर्तनीयस्य निवर्तका न्तराभावे इदमेव निवर्तक वेदितव्यम्॥

सर्वशब्दस्य भेद। चतुर्थीबहुवचने ङेसो ङमित्यामि[7] अकारान्तत्वा-भावेऽप्यामो डेसिमिति[8] बहुवचनाड्डेसिआदेशे। सव्वेसि। पचे। सव्वाण। सव्वाण। सव्वास इति तु सिद्धावस्थायां स्वरस्य विन्दुमीति[9] द्वस्व। शेष पण्हाशब्दवत्। एवं एक्काकइमाशब्दौ। पुदुमादि पण्हाशब्दवत्॥

रुचिशब्दस्य भेद। प्रायो लुगिति[10] चकारस्य लुक्। युगनपि सोरिति[11] सोर्लुक। जस्शसो[12]। शीशू स्त्रियां लिति[13] शीआदेशौ। पचे सुक्[14]। उभयत्रापि शित्त्वाद्दीर्घ[15]। रईओ। रईउ। रई[16]। सयुद्धो। डोसुकाविति[17] सुकि। हे रइ। पचे[18] सोलुकि[19]। हे रअ। टादौ शशाशिशे इति चत्वारोऽपि[20]। रईअ। इत्यादि। भिस्भ्यस्सुप्सु।

---

[1] II 5 [2] II 3 [3] V 7 [4] II 2 [5] T om this word [6] P7 VII, 3, 113 [7] IV, 17 [8] IV 34 [9] V 5 [10] IV 26 [11] IV, 49 [12] R om इति सोर्लुक्। जस्शसो [13] V 3 [14] IV, 9 [15] II 5 [16] R om this word [17] IV, 10 [18] R om this word [19] सोर्लुक्क T, IV 6 [20] V, 6

इकुतोदि[1]। इईहि। इत्यादि। ऊसि। दिदोत्तोदुइगा[2]। ईईहितो। इत्यादि। तिचिशब्दौ पुंल्लिङ्गवत्। तिसादेशस्यापि[3] स्यानिषङ्गावेन[4] तिणितीआदेशा[5]॥

ईकारान्तो लक्ष्मीशब्द। खुहादाविति[6] च। शेषादेशस्त्रीति द्विरूपम्। मा जमग्गसोध।

III *3 ## आदीतस्सोध ॥ ९ ॥

स्त्रियामीकारान्तात्परस्य ओशब्दाक्यसङ्गसोध आदेशो भवति[7]। लो ऊ इति[8] ऊस्वम्। ऊच्छीआ[9]। पक्षे सोर्लुक्[10]। ऊच्छी। ऊच्छीआ। शोआदेशयो[11]। ऊच्छीओ। ऊच्छीउ। संस्कृतौ।

III, 42 ## ह्रस्वलीदूत ॥ १० ॥

संबुद्धावीदूतोर्लाक्षणिकौ[12] ह्रस्वौ भवतः। सोलुक्[13]। हे ऊच्छि। विषयभेदे सत्यपि आदीतस्सोरेवेतस्मिन्प्रवृत्ते[14] सन्निपातलक्षणो विधिर्निमित्तं सहिघातस्रेति[15] ह्रस्वस्य बाधप्रसङ्गाद्विरोधे सति विशेषेण विहितत्वेन[16] प्रथमं ह्रस्वो भवति। परादादीतस्सोरेवेतस्याप्राप्त्यभावान्न[17] प्रवर्तत इति केचिदाहुः। अन्ये तु आदीतस्सोरेत्यस्य नैकान्तिकत्वेन तद्भावे ह्रस्वविधानस्य चरितार्थत्वादादीत इत्येतदेव प्रथमं प्रवर्तते। तत्र च सन्निपातलक्षणह्रस्वाभावे हे ऊच्छीआ इति रूपमित्याहुः। ऊसि। स्वरस्य विन्दुमीति[18] ह्रस्वः। ऊच्छिं। शेषं रुचिशब्दवत्॥

ओशब्दस्य भेदः।

I, 11, 104, 105 ## हर्षामर्षश्रीह्रीक्रियापरामर्शकृत्स्वदिष्यार्हे ॥ ११ ॥

हर्षादिषु हे इत्यत्र च संयुक्तस्याद्यव्यञ्जनस्य प्रागित्त्वं भवति। ओम्भलिति[19] सिद्धम्। सिरी॥

---

[1] IV 53 [2] IV 22 [3] Pā VII, 2 99 [4] Pā I, 1 56 [5] IV 58 and 59 [6] IV 2 [7] IV, 4 [8] II 3 [9] IV, 63 [10] Tom this word [11] IV 6 [12] V 3 [13] II 4 [14] IV 6 [15] V 9 [16] *Paribhāshenduśekhara* 85 [17] विशेषविहितः P [18] °शेतप्राप्त्यभावान्न R °शेवेतत्प्रवृत्त्यभावान्न T [19] V, 5 [20] IV 29

उकारान्तस्तनुशब्द । न इति[1] णत्वम् । तणू । रुचिशब्दवत् । थोतो गुणवचनादिति[2] ङीपि ।

तन्व्याभे ॥ १२ ॥ He ii 118

तन्व्याभा थोतो गुणवचनादिति ङीयन्तेषु तन्व्याभेषु सयुक्तस्याद्य-हल प्रागुक्त भवति । तणुवीआ । लच्छीशब्दवत् ॥

भूशब्दस्य भेद । स्वार्थे तु कथेति वर्तमाने ।

डुमश्रडमश्रोल्[3] भुव ॥ १३ ॥ He ii 167

भूशब्दात्स्वार्थे उमअ अमअ इत्येतौ डितौ[4] भवत । लिङ्गानित्यम्[5] । भुमआ । भमआ ॥

ऋकारान्त स्वसृशब्द । ङीप प्राप्तौ[6] ।

स्वसृगाङ्गाल् ॥ १४ ॥ He iii 35

स्वस्रादेर्ङिद्ध लिङ्ग[8] आप्रत्ययो भवति । ससा । ससाओ । ससाउ । एव णणदा । दुहिआ ॥

मातृशब्दस्य भेद ।

मातुराश्ररा[9] ॥ १५ ॥ He iii, 46

मातृशब्दस्य सुपि परे आ अरा[9] इत्येतौ भवत । तव सकलाधिका राज्ञनन्यधस्य आ देवतार्थस्य अरा[9] इति नियम । माआ । माआओ । इत्यादि । माअरा[9] । माअराओ[9] । तृतीयैकवचने चतुर्थ्येकवचने च उदृतां स्वस्रामसीत्युक्ते[10] । माऊए । माऊअ । माऊआ । माऊइ[11] । चतुर्थीबहुवचने । तत एवागोणस्यापि ।

---

[1] iv 47 Pā iv 1 44 [2] नडुमय° Tri [1] and Tri [4] डुमय° Tri [3], °डमयौ Tri [1] and Tri [2] °डमश्रोल् Tri [b] and Tri [5], °डमानौ R and T [4] iv 7 [5] ii 1 [6] In Tri the four rules preceding Sū v, 14 treat of the feminine affix ङीप् [7] iv, 7 [8] ii, 4 [9] अरा Tri, आरा R and T [10] iv 67 [11] R om the three last words and in erts माऊए । माऊए

Hé i 135

इदुन्मातु [1] ॥ १६ ॥

इतीत्वम् । मारेणं । मारेण ॥
ओकारान्तो[2] गौशब्द ।

Hé i 148 159

ऐच एड् ॥ १७ ॥

ऐकारौकारयोरेकारोकारौ यथासङ्ख्यं भवत । इत्येडादेशे प्राप्ते ।

Hé i, 164

नाव्याव ॥ १८ ॥

गौशब्दे ऐच आव इति भवति ।

Hé i, 179

आदेस्तु ॥ १९ ॥

शब्दानामादेर्नकारस्य णत्तु[3] भवति । णावा । नावा ॥
इति स्त्रीलिङ्गा परिसमाप्ता ॥

Sixth Section

अथ नपुसकलिङ्गा उच्यन्ते ॥
अकारान्तो गुणशब्द ।

Hé i, 34

क्लीवे गुणगा ॥ १ ॥

गुणादयो नपुसके वा प्रयोक्तव्या । इति नपुसकलिङ्गतायाम् ।

Hé iii 25

मड्लुगसवुद्धेनेम ॥ २ ॥

नपुसकात्परस्य सोडागुबन्धो मकारो लुक् च भवति । असङ्घे ।
सङ्घेन भवति । ङकार सानुनासिकोच्चारं ङिदिति[4] सानुनासिकोच्चा-
राथ । अकार उच्चारणार्थं । षड्लाधिकाराद्कारान्तान्न लुक्[5] ।
अन्यच मड्लुकौ पर्यायेण भवत । लुम्विधानेन च मडा बाध्यमान सो
लुगिति[6] लुगेव प्रतिप्रसूयते । डोआदेशस्तु[7] मडा बाध्यते । गुण । जस्शसो ।

---

[1] R and T om the first letter इ [2] ओकारान्तो R and T
[3] II 3 [4] II 6 [5] III, 1 [6] IV 6 [7] IV 7

ग्निग्निग्गिड् जश्शस् [1] ॥ ३ ॥ Hē III 26

नपुंसकात्परौ जस्शसौ ग्नि ग्नं ग्ड इति चीनादेशानापद्येते। ग्निग्नि ङीरेक सविन्दुक अपरो ङित्[2]। ग्न इति[3] णत्वम्। गुणाणि। गुणाइं। गुणाइँ। सुरजश्शसो [4] श्शसोः[5] इत्येतविभिरादेशैर्बाध्येते। सबुद्धौ। अमबुड्डेरिति[6] निषेधात् सडादेशो ग भवति। डोसुकाविति[7] विकल्पे। हे गुणो[8]। पक्षे सोर्लुकि[9]। हे गुण। हे गुणाणि। हे गुणाइ। हे गुणाइँ। शेषं वृषशब्दवत्[10] ॥

सर्वशब्दस्य भेदः। प्रथमाद्वितीययोर्गुणशब्दवत्। शेषं पुल्लिङ्गसर्वशब्दवत्। प्रथमादि गुणशब्दवत् ॥

इकारान्तो दधिशब्दः।

खघथधभाम् ॥ ४ ॥ Hē i, 187

असंयुक्तानामनादौ वर्तमानानामपि परेषां ख घ थ ध भ इत्येतेषां प्रायो हकारो भवति। मडि[11]। दहिं[12]। लुकि[13]। दहि। जस्शसोः ग्निग्गिग्गिड [14]। दहीणि। दहीइ। दहीइँ। सबुद्धौ। अनपीति निषेधात्[15] सुड्न भवति। असबुड्डेरिति निषेधात्[16] सड्न भवति। सोर्लुक[17]। हे दहि। शेषमग्निशब्दवत्। तृतीयादिष्वेकवचनाद्यादेशवशेनानजादित्वात्[18] वाऽन्तलकाद्वानडादेशाभावः[19]। द्विचिशब्दो पुल्लिङ्गवत्। वामणीशब्दो दधिशब्दवत् ॥

उकारान्तो बिन्दुशब्दः। क्लीबे गुणगा इति[20] नपुंसकत्वम्[21]।

हलि ङञणनाम् ॥ ५ ॥ Hē i 25

ङ ञ ण न इत्येतेषां हलि परे बिन्दुर्भवति। इति नित्यं बिन्दौ प्राप्ते।

---

[1] जस्शसोः T [2] vi 6 [3] iv 47 [4] iv 9 [5] iv, 12
[6] vi, 2, अमबुड्डाविति R and T [7] iv 10 [8] T adds हे गुणा
[9] iv, 6 [10] वृषवत् T [11] vi, 2 [12] दधि R [13] vi 2
[14] vi 3 [15] iv, 49 [16] vi 2 [17] iv 6
[18] °वचनाद्याद्या° R —iv 52 [19] Pā vii, 1, 75 [20] vi 1
[21] T om this sentence

He. i. 30

वर्गेऽन्त्य ॥ ६ ॥

विन्दोर्वर्गे परे प्रत्यासन्नस्तस्यैव वर्गस्यान्त्यस्तु[1] भवति। विदुं विदु[2]। विन्दु। विन्दु[3]। शेष दधिशब्दवत्। गन्धशब्दो विन्दुशब्दवत्

ऋकारान्त कर्तृशब्द। रेफलोप[4]। द्वित्वम्[5]। सौ। आ सं वेत्याक्त्वम्। मड्डमुगसमुदेरिति[6] मड्ड। ह्रस्वस्य विण्डमीति[7] ह्रस्व कर्त्ता। सुकि[8] तु। कत्ता। पचे आरम्भपीत्यारादेशे[9]। कत्तार त्रसादिषु। उदृतो लम्बाममीलुक्ते[10]। कत्तूणि। कत्तूए। कत्तूहिं आरादेशे[11]। कत्तारेहि। कत्तारए। कत्तारहिं। सबुद्धौ। ङ ऋद् लादित्यक्ते[12]। हे कत्ता। आ सौ वेत्याक्ते[13] सोर्लुगिति[14] लुक। हे कत्ता आरादेशे[15] तु डोआदेशे[16]। हे कत्तारो। सुकि[17]। हे कत्तार। उकारा देशे[18] विन्दुशब्दवत्। आरादेशे[19] गुणशब्दवत्॥

इत्यञ्जना परिसमाप्ता॥

SINDHI SECTION

अथ इलन्ता प्रदर्श्यन्ते[20]॥

रेफान्त पुल्लिङ्गचतुरशब्द। अस्मदो।

He. iii. 120

चतुरो जश्शस्भ्या चउरोचत्तारोचत्तारि ॥ १ ॥

चतुरशब्दस्य जश्शस्भ्यां सह चउरो चत्तारो चत्तारि इति त्रय आदेशा भवन्ति। चउरो। चत्तारो। चत्तारि। भिसादौ।

He. i. 11 19

अन्त्यहलोऽप्रदुदि ॥ २ ॥

शब्देष्वन्त्यहलो लोपो भवति। यदित्यर्थे उदित्युपसर्गे च न। इति रेफलोप। दृदुतोदिरिति[21] नित्यं दीर्घे प्राप्ते।

---

[1] T om वर्गस्य.—II 3 R and T om this word [2] विन्दु R
[4] बिदु T [5] IV 32 [6] IV 4 [7] IV 66 [8] VI 2
[9] V, 5 [10] VI, 2 [11] IV, 65 [12] IV, 67 [13] IV, 65
[14] IV 68 [15] IV 66 [16] IV 6 [17] IV 65 [18] IV, 10
[19] IV 6 [20] IV 67 [21] IV 65 [22] प्रारभ्यन्ते T [23] IV 63

चतुरो वा ॥ ३ ॥ He iii, 17

चतुरशब्दस्योदन्तस्य भिस्भ्यस्सुपि परे दीर्घो वा भवति। चउहि। चऊहि। चउहिँ। चऊहिँ। चउहि। चऊहि। चउसुतो। चऊसुतो[1]। इत्यादि। चउसु। चऊसु। चउसु। चउसु। आमि। एहएह सख्याया आमोऽविभक्तिनि। इति एह एह[2] इत्यादेशो भवत[3]। चउएह। चउएह॥

मकारान्त किंशब्द। सो।

चतसि च किमो स्क ॥ ४ ॥ He iii 71

चतसोर्यकारात्सुपि च परे किंशब्दस्य स्किल्को[4] भवति। को। तृतीयैकवचने।

इदमेतत्किंयत्तद्भ्यष्टो डिणा ॥ ५ ॥ He iii 69

एभ्य सर्वादिभ्योऽदन्तेभ्य परस्य टाप्रत्ययस्य डिदिणा[5] तु भवति। किणा। चतुर्थ्येकवचने।

किंयत्तद्भ्यो डस[6] ॥ ६ ॥ He iii 63

किंयत्तद्भ्य परस्य डस शित्सकारो[7] वा[8] भवति। कास। आमि[9]।

किंतद्भ्यां सण् ॥ ७ ॥ He iii 62

किंतद्भ्यां परस्याम शित्सकारो[10] वा भवति। कास। डसौ।

म्हा डसे ॥ ८ ॥ He iii 66

किंयत्तद्भ्य परस्य डसे म्हा इति तु[11] भवति। कम्हा।

किमो डीसडिणो ॥ ९ ॥ He iii 68

डीसडिणो इत्यविभक्तिको निर्देश। किम परस्य डसेर्डिती[12] ईस

---

[1] चउहि। चऊहि। चउहि। चउहिं। चउसुतो। चउसुतो R
[2] iv, 57 [3] R om एह एह [4] R om this word
[5] ii, 4 [6] iv 7 [7] ii 3 [8] डस् Tri [9] ii, 5
[10] T om वा [11] T om आमि and the text and commentary of vii, 7 [12] ii 5 [13] ii, 3 [14] iv 7

एषो एति तु[1] भवत । कोस । किणो । आदेशाभावपक्षे सर्वशब्दवत्। सप्तम्येकवचने स्वयमेव विशेष प्रदर्श्यते ।

H8 iii 63 **डिरिआडाहेडाला काले ॥ १० ॥**

कालेऽभिधेये क्रियमाणस्य परो डि इआ इत्यादेश डितौ[2] आहे आला इत्येतौ च[3] वा पर्यायेण भवतः । कइआ । काहे । काळा । पक्षे कत्थ इत्यादि । इदशब्दस्य भेद । सौ ।

H8 iii 72 **इदम इम ॥ ११ ॥**

इदम मुपि परे इम इत्यादेशो भवति । इति नित्यमिमादेशे प्राप्ते ।

H8 iii 73 **पुसि सुना त्वय स्त्रियामिमिआ ॥ १२ ॥**

इदम सुना सहितस्य पुसि अयमिति स्त्रियामिमिआ इति च तु[4] भवति । अअ । इमो । द्वितीयातृतीययो ।

H8 iii 77 **टासासि ण ॥ १३ ॥**

टासि तृतीयायामसि द्वितीयायां च परत इदम स्थाने ण इत्यादेशस्तु[4] भवति । ण । णे । इम । इमे । णेण । णेहि । इमेण । इमेहिं । अमि ।

H8 iii 75 78 **इहेण ङ्यमा ॥ १४ ॥**

डि अम इत्येताभ्यां सहितस्येदम स्थाने इह ण इत्येतौ क्रमेण तु[4] भवत । इह । इदमेतत्क्रियमाणस्य इति[5] डिणादेश[6]। णिणा । इमिणा । मिसि[7]।

H8 iii 74 **अत्तुप्स्सिहिस्से[8] ॥ १५ ॥**

इदम मुपि डिभिसङसादेशेषु स्सि हि स्स इत्येतेषु[9] च परत अत्त तु भवति । भिसभ्यस्सुपोरेत्त्वम[10]। एहि । चतुर्थ्याम् ।

---

[1] II, d [2] IV 7 [3] T om च [4] II 3 [5] VII 5
[6] डिद्दिणादेश R [7] T om मिसि [8] अत्तुस्सि° Tri, R and T
[9] इत्यादेशेषु T [10] IV 16

तदिदमेतदा सेसि तु डसामा ॥ १६ ॥ Hé III, 81

तद् इदम् एतद् इत्येतेषां स्थाने डस् आम् इत्येताभ्यां सह यथासङ्ख्यं से सि इत्यादेशौ भवत । से । अत्तुप्सिहिस्से[1] इत्यत्ते । अस्त । सि । ङौ । इहेणं ध्यमेतोहादेशे[2]। इह । तद्भावे । ङेस्त्यस्मिन्निति[3] त्रिष्वपि प्राप्तिषु ।

न त्य ॥ १७ ॥ Hé III 76

इदम परस्य ङिवचनस्य त्यादेशो न भवति । इमस्सि । इमम्मि । अत्तुप्सिहिस्से[4] इत्यत्ते । अस्सि । सुप्यप्यत्ते । एसु । एसु । वैकल्पिकादेशाभावे इमादेश[5]। तत्र सर्वशब्दवत्प्रक्रिया ॥

नकारान्तो राजन्शब्द । अन्त्यहलोऽथदुदीति[6] नलोप । सौ ।

राज्ञ ॥ १८ ॥ Hé III, 49

राजन्शब्दस्य नलोपे अन्त्यस्य सौ परे आत्त्व वा भवति । प्रायो लुगिति[7] जकारस्य लुक् । सोलुक्[8]। राआ । हे राआ । पचे सोडो[9]। राओ । हे राओ । हे राअ ।

पुस्याणो राजवच्चान ॥ १९ ॥ Hé III 56

पुल्लिङ्गे वर्तमानस्यानित्यस्य[10] स्थाने आण इत्यादेशो वा भवति । पचे राजवत्कार्य च भवति । इत्याणादेशे । राआणो । आणादेशाभावे राज इत्यकारान्ते च वृषशब्दवत्। तत्र विकल्पवशेन रूपभेद प्रदर्श्यते। असि।

जश्शसङसिङसा णोश् ॥ २० ॥ Hé III 50

राज्ञ परेषां जस् शस् ङसि ङस् इत्येषां शानुबन्धो[11] णो इत्यादेशो वा भवति ।

---

[1] VII 15 [2] VII, 14 [3] IV 35 [4] VII, 15
[5] VII, 11 [6] VII 2 [7] IV 26 [8] IV, 6 [9] IV, 7
[10] *Ie* अन् इति अस्य [11] II, 5

इणो इति तु[1] भवत । कीस । किणो । आदेशानामभावपक्षे सर्वशब्दपक्षे सप्तम्येकवचने लक्षणवशेन विशेष प्रदर्शते ।

He iii 65

डिरिआडाहेडाला काले ॥ १० ॥

कालेऽभिधेये किंयत्तद्भ्य परो डि इआ इत्यादेश डितौ[2] आहे आला इत्येतौ च[3] वा पदते । कइआ । काहे । काळा । पक्षे कत्य इत्यादि ।

इदशब्दस्य भेद । सौ ।

He iii, 72

इदम इम ॥ ११ ॥

इदम सुपि परे इम इत्यादेशो भवति । इति नित्यमिमादेशे प्राप्ते ।

He iii 73

पुसि सुना त्वय स्त्रियामिमिआ ॥ १२ ॥

इदम सुना सहितस्य पुसि अयमिति स्त्रियामिमिआ इति च तु[4] भवति । अअ । इमो । द्वितीयातृतीययो ।

He iii 77

टासंसि ण ॥ १३ ॥

टासि तृतीयायामसि द्वितीयायां च परत इदम स्थाने ण इत्यादेशस्तु[4] भवति । ण । णे । इम । इमे । णेण । णेहि । इमेण । इमेहि । अमि ।

He iii, 75 78

इहेण ङ्यमा ॥ १४ ॥

ङि अम इत्येताभ्यां सहितस्येदम स्थाने इह इण इत्येतौ क्रमेण तु[4] भवत । इण । इदमेतत्किंयत्तद्भ्य इति[5] डिणादेश[6] । णिणा । इमिणा । मिसि[7] ।

He iii 74

अत्सुप्सिहिस्से[8] ॥ १५ ॥

इदम सुपि डिभिसडसादेशेषु स्सि हि स्स इत्येतेषु[9] च परत अत्तं उ भवति । भिसभ्यस्सुपोरेत्त्वम्[10] । एहि । चतुर्थ्याम् ।

---

[1] II 3 [2] IV 7 [3] T om च [4] II 3 [5] VII 5
[6] डिदिणादेश R [7] T om भिसि [8] अत्सुस्सि° Tri, R and T
[9] इत्यादेशेषु T [10] IV 16

वात्मभस्मनि प ॥ २६ ॥ He ii 51

आत्मभस्मनो स्नो [1] पो वा भवति। द्वित्वम्[2]। अप्पन् इति स्थिते। पुम्यणो राजवच्च इत्याणादेश[3]। अप्पाणो। अन्त्यहलोऽअदिति[4] नलोप। राजवन्नावात राज्ञ इत्यात्वम्[5]। अप्पा। आणादेशे। अप्पाणो। अप्प[6] इत्यकारान्ते च वृषभशब्दवत्। तत्र विशेष। राजवन्ना वात् टो णा[8] अश्वस्डसिडसां णोगित्येते[9] प्रवर्तेते। णोणाडिप्विदमा अ[10]। इणममामा[11]। भिस्भ्यसांसुप्स्वीत[12]। डस्डसिटां णोणोडण[13]। इत्येतानि तु न प्रवर्तन्ते। जनासबन्धत्वात[14]। अप्पाणो चिट्ठन्ति। पेच्छ वा। तृतीयैकवचने।

टो वात्मनो णिआणइआ ॥ २७ ॥ He iii 57

आत्मन परस्य टावचनस्य णिआ णइआ इत्यादेशौ वा भवत। अप्पणिआ। अप्पणइआ। पक्षे टो णा[15]। अप्पणा। डस्डस्ङोर्णो[16]। अप्पाणो धण। आगओ वा। पादेशाभावपक्षे[17] मनयामिति[18] मकारलोप। द्वित्वम्[19]। अत्ता। शेष पूर्ववत। अप्पणो अत्तणो इति तु आत्मन इति सिद्धमुपादेशादौ[20]।

अतो डो विसर्ग ॥ २८ ॥ He i 37

अकारात्परो विसर्गो डोआदेशमापद्यते। इति डोआदेशे द्रष्टव्यम॥ दकारान्तस्तद्शब्द। अन्त्यलोप[1]। सो।

तस्सौ सोऽक्लीबे तदश्च ॥ २९ ॥ He iii 86

तदश्चकारादेतदश्च तकारस्य सो परे सकारो वा भवति। अक्लीबे अनपुंसके। अय च विकल्पो वाऊलकादेतच्छब्द एव। तच्छब्दे तु नित्यम्।

---

[1] i 8 [2] iv, 4 [3] vii 19 [4] vii 2, Rom ऽअद [5] vii 18 [6] अप्पा R [7] T om the passage from राज वन्नावात to विशेष [8] vii 23 [9] vii 20 [10] vii 21 [11] vii, 22 [12] vii 25 [13] vii 24 [14] *I e* जना (vii 21) असबन्धत्वात [15] vii, 23 [16] vii 20 [17] vii 26 [18] iv, 48 [19] iv, 4 [20] इत्यसिद्ध° R —°सुपा° R and T, vii 26 [21] vii 2

He III 50 **णोणाडिण्विदना ज ॥ २१ ॥**

राजन्शब्दसम्बन्धिनोऽना सहितस्य जकारस्य णो णा इत्यादेशयोर्डि वचने च परे इकारो वा भवति। राइणो। पचे शित्त्वाद्गेर्घे[1]। राआणो। अमि।

He III 53 **इणममामा ॥ २२ ॥**

राजन्शब्दसम्बन्धिनोऽना सहितस्य जस्य अम् आम् इत्येताभ्यां सह इण इत्यादेशो वा भवति। राइण। शसि णोश्[2]। राइणो। राआणो। तृतीयैकवचने।

He III 51 **टो णा ॥ २३ ॥**

राजन्शब्दात्परस्य टावचनस्य णा इत्यादेशो वा भवति[3]।

He III 55 **ङस्ङसिटा णोणोडेण् ॥ २४ ॥**

ङस्ङसिटावचनानां यो णाणादेशा तयो परतो राजन्शब्दसम्बन्धिनोऽना सहितस्य जस्य डिदणित्यादेशो[4] वा[5] भवति। रण्णा। पचे णोणाडिण्वितीकार[6]। राइणा। पचे। राआणा।

He III 54 **भिस्भ्यसामुप्स्वोत् ॥ २५ ॥**

राजन्शब्दसम्बन्धिनोऽना सहितस्य जस्य भिस् भ्यस् आ सुप् इत्येतेषु परेष्वोकारो वा भवति। राईहि। चतुर्थ्याम्। णोङसि ङणि[7]। रण्णो। णोणाडिण्वितीकारे[8]। राइणो। पचे। राआणो। भिस्भ्यसामुप्स्वोदितीकार[9]। राईसुतो। इत्यादि। ङौ। णोणाडिण्वितीकार[10]। राइम्मि। सुपि। भिस्भ्यसामुप्स्वोदितीकार[11]। राईसु ॥

आत्मनशब्दस्य भेद। सयोग इति[12] ह्रस्व।

---

[1] II 5 VII 20 भवति वा T [4] IV 7.
[5] T om वा [6] VII 21 [7] VII 24 [8] VII 21
[9] VII 25 [10] VII 21 [11] VII 25 [12] IV 25

Eighth Section

अथ स्त्रीलिङ्गा प्रदश्यन्ते ॥
रेफान्तो गिरशब्द [1]। अन्यलोपि प्राप्ते।

रो रा ॥ १ ॥ He i, 16

स्त्रीलिङ्गस्यान्यरेफस्य रा इत्यादेशो भवति। गिरा। पण्हाशब्दवत् ॥
मकारान्त किंशब्द । सौ । चतसि च किमो न्क [3]। इति कादेश । टाप्[4]। असादिषु।

कियत्तदोऽस्वमामि सुपि ॥ २ ॥ He iii 33

सुभ्मआवजिते सुपि परे कियत्तद स्त्रियां ङीव्वा भवति। कीओ। अमि ङीप्प्रतिषेधात्क । चतुर्थ्येकवचने अनदन्तलेऽपि बङ्गलाधिकारात्[5] कियत्तद्भ्यो ङस इति[6] सश्चादेशे। कीस। कास।

ईतस्सेस्सा ॥ ३ ॥ He iii, 64

ईकारान्तेभ्य कियत्तद्भ्य परस्य ङस से[8] स्सा इति वा भवति। कीसे[9]। सयोग इति[10] ह्रस्व । किस्सा[11]। आमि । अस्वमामीति निषेधात्[1] ङीभ्र भवति। आसामिति[13] बङ्गवचनाङ्डेसिआदेश सश्चा देशश्च[14]। केसि। कास। ङी। अनिदमेतदस्त्रियति[15] हिआदेश । तच वाङ्गलकादेश कियत्तदोऽस्वमामीति[16] ङीभ्र भवति। काहि। टाबन्ते शेष पण्हाशब्दवत्। ङीबन्ते लक्ष्मीशब्दवत ॥
इदशब्दस्य भेद । पुसि सुनेति[17] इमिआदेश । इमिआ। पक्षे। इदम इम इतीमादेश [18]। इमा। तच।

---

[1] गौर्° R and T [2] VII, 2 [3] VII 4 [4] Pā IV, 1, 4 [5] III, 1 [6] VII 6 [7] ईतस्सेसाद् Tri [8] ङसे स्से R and T [9] किस्से R and T [10] IV 25 [11] T places किस्सा before सयोग [12] VIII 2 [13] IV, 34 [14] VII 7 [15] IV, 36 [16] VIII 2 [17] VII 12 [18] VII 11

He i 131

ऋतुगे ॥ ४० ॥

ऋत्वादिभ्यादेश्चत उत्त्व भवति। प्रायो लुगिति[1] वकारस्य लुक्। अत्यनोपे[2] प्राप्ते।

He i 19

दिक्प्रावृषि ॥ ४१ ॥

दिक्प्रावृषोरन्त्यहल लो भवति। पाउसो। शेष पूर्ववत्॥
सकारान्तो यशस्शब्द ।

He i 30

स्तमदामशिरोनभो नरि ॥ ४२ ॥

मान्त नान्त च शब्दरूप नरि पुसि प्रयोक्तव्यम्। दामन् शिरस् नभस इत्येतान्वर्जयित्वा। इति पुल्लिङ्गम्। आदेर्ज इति[3] ज। अत्यनोप[4]। जसो॥

अदसशब्दस्य भेद ।

He iii 88

सुप्यदसोऽमु ॥ ४३ ॥

सुपि परे अदस स्थाने अमु इति भवति। इति नित्यमम्वादेशे प्राप्ते।

He iii 87

अहङ्गा सुना ॥ ४४ ॥

अदस सुना सह अहत् इत्यादेशो वा भवति। तकारस्तावन्नावप्रदर्शनार्थ। तेन स्त्रियामात्त्व न भवति। अह। पचे। अमू[5]। डौ।

He iii 89

इश्शौ म्मौ[6] ॥ ४५ ॥

अदसो ङिवचनादेशे म्मौ[6] परे इअ अअ इत्यादेशौ वा भवत। इअम्मि। अअम्मि। पचे। अमुम्मि। शेष तरुशब्दवत्॥

इति पुल्लिङ्गा परिसमाप्ता ॥

---

[1] iv 26 [2] vii 2 [3] vii 33 [4] vii 2 [5] vii 43
[6] Thus Tri मौ P and T iv 30 vii 43

सेसिआदेशौ । से । सि । एआण । डोपि[1] । एईण । डसौ । एत्तोएत्ताहे डमिनेतद्[2] । एत्तो । एत्ताहे । शेष सर्वशब्दवत् ॥

प्रतिपद्शब्दस्य भेद ।

प्रतिगेऽप्रतीपगे ॥ ७ ॥ He i 206

प्रत्यादिषु तस्यैकस्य डो भवति । अप्रतीपगे । प्रतीपादिषु न भवति ।

तु समृद्ध्यादौ ॥ ८ ॥ He i, 44

समृद्ध्यादिष्वादेरवर्णस्य दीर्घस्तु[3] भवति ।

अविद्युति स्त्रियामाल् ॥ ९ ॥ He i 15

स्त्रीनिङ्गस्यान्त्यहलो लिदात्त्व[4] भवति । अविद्युति । विद्युच्छब्दे न भवति । रेफलोप[5] । पो व इति[6] वत्वम् । पाडिवआ । पडिवआ ॥

तकारान्त सरित्शब्द । अविद्युति स्त्रियामालित्याकार[7] । सरिआ ॥

सकारान्तोऽप्सरसशब्द ।

स आयुरप्सरसो ॥ १० ॥ He i 20

अनयोरन्त्यहल सो वा भवति ।

थ्यश्चत्सप्तामनिश्चले ॥ ११ ॥ He ii 21

निश्चलवर्जिते थ्य श्च त्स प्स इत्येतेषां छो[8] भवति । अच्छरसा । पक्षेऽन्त्यलोप[9] । अच्छरा । बहुधवाचिलात्सर्वत्र बहुवचनमेव । अच्छर साओ । अच्छराओ । अप्सरा इत्यपि दृश्यतात्रार्षिकबहुत्वमिति[10] धीरस्वामी ॥

अदस्शब्दस्य भेद । सौ । अहवा सुनेति[11] अहदादेश । मुयन्तादे शत्वात्[12] तपरकरणाद्वा टाम्[13] भवति । अह । पक्षे[14] । सुप्यदसोऽमु[15] । अमू । शेष तनुशब्दवत् ॥

इति स्त्रीनिङ्गा परिसमाप्ता ॥

---

[1] VIII 4, P places डोपि before एआण VII 35 [2] II 3 [4] II 4 [5] IV 32 [6] IV 62 [7] VIII 9 [8] च्छो T [9] VII 2 [10] This quotation occurs actually in Kshīrasvāmin's commentary on the *Amarakosa*, edited by Borooah p 68 (I 1 51) [11] VII 44 [12] T adds वा [13] P I IV 1, 4 [14] T om this word [15] VII 43

Ninth Section

अथ नपुसकलिङ्गा प्रदर्श्यन्ते[1] ॥
धनुरशब्द पुल्लिङ्गवत । मकारान्त किशब्द । स्वमो ।

He III, 80 **कि कि ॥ १ ॥**

क्लीबे वर्तमान किशब्द स्वमा सहित किमेव भवति । अन्यच्च कादेश[2] । प्रथमाद्वितीययोर्गुणशब्दवत् । अन्यच्च पुल्लिङ्गवत् ॥
इदशब्दस्य भेद ।

He III 79 **क्लीबे स्वमेदमिणमिणमो ॥ २ ॥**

नपुसकस्येदशब्दस्य सु अम् इत्येताभ्यां सहितस्य इद इण इणमो इत्यादेशा भवन्ति । इद । इण । इणमो । प्रथमाद्वितीययोर्गुणशब्दवत् । शेष पुल्लिङ्गवत ॥
यत्तदेतदामन्यलोपे[3] प्रथमाद्वितीययोर्गुणशब्दवत । अन्यच्च पुल्लिङ्ग वत् । ज । तं । एम । एणमो । एण । एअ । इत्यादि ॥
सकारान्तो धनुसशब्द ।

He I 22 **धनुषि वा[4] ॥ ३ ॥**

धनुशब्देऽन्त्यहलो हो वा भवति । न इति[5] णत्वम् । धणुह । धणु । सकारान्तत्वेऽपि[6] बाहुलकान्नपुसकत्वम् ॥
अदसशब्दस्य भेद ।
अहवा मुणा[7] । अह । मुणदसोऽमु[8] । अमु ॥
इति हलन्ता परिसमाप्ता ॥

---

[1] उच्यन्ते T [2] VII 4 [3] VII 2 [4] हु T [5] IV, 47
[6] VII 42 [7] VII 44 [8] VII 47

Tenth Section

युष्मद्शब्दस्य भेद ॥

सौ ।

युष्मत्सुना तुवतुतुमतुह ॥ १ ॥ He iii

युष्मच्छब्द सुना सहित तुव तु तुम तुह इति चतुर आदेशान्प्राप्नोति। तुवं । तु । तुम । तुह । त इति तु स्वमित्यस्य सिद्धस्य सवरामधेयेति[1] वलोपे द्रष्टव्यम् । जसि ।

जसा भेतुब्भेतुय्हेउय्हेतुब्भ[2] ॥ २ ॥ He iii

युष्मज्जसा सह भेआदिपञ्चकमापद्यते[3] ।

वा ब्भो[4] म्हब्भौ ॥ ३ ॥ He iii

युष्मदादेशसबन्धिनो द्वित्वस्य भकारस्य[5] म्ह ब्भ इत्येतौ वा भवत । इति तुब्भे तुब्भ[6] इत्यनयोर्विकल्पेन म्हब्भौ प्रत्येक भवत । भे । तुब्भे[7] । तुम्हे । तुज्झे । तुय्हे । उय्हे । तुब्भ[8] । तुम्ह । तुज्झ । इति नव रूपाणि । अमि ।

अमा तुमेतुए च ॥ ४ ॥ He iii,

युष्मदमा सह तुमे तुए इत्येतौ चकारात्तुवमादि चतुष्टय[9] चापद्यते । तुमे । तुए । तुव । तुं । तुम । तुह । इति षट । तं इति तु स्वमित्यस्य वलोपे[10] स्वरस्य विन्दुमीति[11] हस्वे च द्रष्टव्यम् । शसि ।

शसा वो च ॥ ५ ॥ He iii,

युष्मच्छसा सह वो इति चकारात भे[12] इत्यादीयादेशानापद्यते । वो । भे । तुब्भे[13] । तुम्हे । तुज्झे । तुय्हे । उय्हे । तुब्भ[14] । तुम्ह । तुज्झ । इति दश । तृतीयैकवचने ।

---

[1] iv, 32 [2] भे° Tri [1] and Tri [3] हे° Tri R and T °तुब्भे° Tri [1] and Tri [3] °तुम्हे° Tri [2] °तुह्हे° R and T °उय्हेतुब्भ Tri [3], °तुयभेतुब्भ Tri [1] °तुम्हेउय्हेतुब्भ Tri [2] °उय्हेतुहह R °तहहउय्हे T [3] हे° R and T [4] ब्भो Tri [1] and Tri [3] ह्हो Tri [2], R and T [5] हकारस्य R and T [6] तुह्हे तुहह R and T see Pischel *de gr Pr* p 3 [7] हे । तुह्हे R and T [8] तुहह R and T [9] x 1 [10] iv, 32 [11] x, 3 [12] हे P and T x, 2 and 3 [13] हे । तुह्हे R and T [14] तुहह P and T

He. III 94 टा भेतेदेदितुमतुमद्[1] ॥ ६ ॥

युष्मट्टावचनेन सह भे इत्यादि पञ्चकमापद्यते[2]।

He III 94 101 ङिटाभ्या तुमएतडतएतुमाडतुमे[4] ॥ ७ ॥

युष्मत् ङिटाभ्यां सह तुमए इत्यादि पञ्चक चापद्यते। भे[5]। ते। दे। दि। तुम। तुमद्। तुमए। तद्[6]। तए। तुमाद्। तुमे। इति दश[8]। भिसि।

He III 95 भिसा भेतुब्भेह्युब्भेह्युय्हेहितुय्हेहि[9] ॥ ८ ॥

युष्मद्भिसा सह भे[10] इत्यादीनि पञ्च[11]। तुब्भेहि उब्भेहीत्यनयोर्वा[12] ब्भो[13] म्हज्झाविति[14] म्हज्झादेशयोश्चत्वारि च रूपाण्यापद्यते[15]। भे। तुब्भेहि[16]। तुम्हेहि। तुज्झेहि। उब्भेहि[17]। उम्हेहि। उज्झेहि। उय्हेहि। तुय्हेहि। इति नव। ङसि।

He III 99 तुब्भोब्भोय्हतइतुहतुहतुम्हतुयतुमतुमेतुमाइतुमोदेतेदि-तुइए[19] ङसा ॥ ९ ॥

युष्मत् ङसा सह तुब्भाद्यष्टादशकमापद्यते[19]। तुब्भोब्भयोर्वा[20] म्हज्झो[21]। तुब्भ[22]। तुम्ह। तुज्झ। उब्भ[23]। उम्ह। उज्झ। उय्ह। तइ। तुह। तुह[24]। तुम्ह[25]। तुय। तुम। तुमे। तुमाइ। तुमो। दे। ते। दि। तु। इ। ए। इति ङावित्रिंशति। आमि।

---

[1] भे° Tri [3] हे° Tri [1] Tri [2] R and T हे P and T [2] Read षट्कमा (?) [4] तुइ° Tri [2] Tri [3] and L. °तुए° the same and T [5] हे R and T [6] तुइ R and T [7] तुए R [8] Read इत्येकादश ( ) [9] Thus Tri [1] and Tri [3] हेतुहहिब्भुहहेब्भु° R and T [10] हे P and T [11] T adds आपद्यते [12] तुहहेहि उहहेहीत्य° I and T [13] हहो R and T [14] x 3 [15] रूपाणि भवन्ति T [16] हे। तुहहेहि P and T [17] उहहेहि R and T [18] Thus Tri तुहहोहहोय्ह° R and T °तुइतुहतुह° T, °तुम्ह° Tri [1] and Tri [2] °तुम्ह° Tri [3] R and T [19] तुहहाद्य° R and T [20] तुहहोहहयोर्वा R and T [1] x 3 [2] तुहह R and T [23] उहह R and T [4] तुह। तुह T [25] तुम्ह R and T

उम्हाणतुब्भतुब्भाणतुमाणतुवाणतुहाणतुब्भवो- भेत्वामा[1] ॥ १० ॥ H8 II

युष्मद्दामा सह उम्हाणादि दशकमापद्यते । तुब्भ तुब्भाण तुब्भ इत्येतेषां वा म्हज्ञौ । उम्हाणतुब्भाणतुमाणतुवाणतुहाणानां[4] क्रमेण पोरिति[5] बिन्दुविकल्प । उम्हाण । उम्हाण । तुब्भ । तुम्ह । तुज्झ[6] । तुब्भाणं । तुब्भाण । तुम्हाण । तुम्हाण । तुज्झाण । तुज्झाण । तुमाण । तुमाण । तुवाण । तुवाण । तुहाण । तुहाण । तुब्भ । तुम्ह । तुज्झ । भो । भे[9] । तु । इति चयोविंशतिः । ङसा ।

तुब्भत्तहितोतुम्ह[10] ङसिना ॥ ११ ॥ H8 II

युष्मत् ङसिना सह तुब्भ[11] त्तहितो तुम्ह इति त्रीणि रूपाण्यापद्यते । तुब्भेत्यस्य[12] वा म्हज्ञौ[13] । तुब्भ[14] । तुम्ह । तुज्झ । तहितो । तुम्ह ।

अथ ङसौ परे प्रत्यादेशा उच्यन्ते ।

तुतुइ[1] ङिम्ङसौ ॥ १२ ॥ H8 III 102

ङिप् सप्तमी । सप्तम्यां ङसौ च परतो युष्मद्यथासङ्ख्यं तु तुइ इत्येतावापद्यते । ङिम्ङस्योर्यथाप्राप्तं तुवादय आदेशा भवन्ति ।

तुवतुमतुहतुब्भ[16] ॥ १३ ॥ H8 III 102

ङिपि ङसौ च परे युष्मत् तुव तुम तुह तुब्भ[1] इति चत्वार्यापद्यते । तुब्भेत्यस्य[15] वा म्हज्ञौ[19] । ङिम्ङस्योर्यथाप्राप्तमेव [9] । ईप्सितयथासङ्ख्य

---

[1] तुम्हाण° Tri1 °तुहह° (without *anusvara*) R and T °तुहहाण° R and T °तुवाणतुमाण° Tri1 and Tri2, °तुहहवोहे° R and T [2] तुहह तुहहाण तुहह R तुहह तुहहाण इत्यनयोर्वा T [3] x 3—T adds इति म्हज्ञादेशौ [4] उम्हाणतुहहाण° R उम्हाणतम्हाण° T [5] iv 14 [6] तुहह । तुम्ह । तुज्झ R and T तुहहाण । तुहहाण R and T the latter places them after तुज्झाण [8] तुहह R and T [9] ह R and T [10] तुब्भ° Tri1 and Tri3 तुहह° Tri2, R and T °तुहितो° Tri [11] तुहह R and T [12] तुहहे° R and T [13] x 3 [14] तुहह R and T [15] °तद् Tri1 [16] °तुब्भ Tri1 and Tri3 °तुज्झ Tri1,2 °तुहह R and T [17] तुहह R and T [18] तुहहे° R and T [19] x 3 [20] °मेवमीप्सित° T

सिद्धयो योगविभाग । तत्र तुर्[1] इत्यादेशादुत्तरस्य ङसे पुनपुसकयो-र्नृनपि ङसिङसोरिति णोआदेशो हितो इत्यादि चतुष्टय[2] च । स्त्रियां तु ङसेश्चयाशिशे इति[3] चतुष्टयं च । तुवादिपट्टे पुनपुसकयो सुगादेशो[4] हितो इत्यादि चतुष्टय[5] च । स्त्रियां तु पूर्ववत् । तथाकारा-न्तस्येन टापि नातश्चेति निषेधाच्छादेशोऽनदन्तत्वान्नास्तीति केचिदाहु । अन्ये तु वाऽन्तकादत्व टाप् न क्रियते। ततश्च शादेशादयश्च[6] भवन्तीत्याहु । तत्र तुरशादेशे । तुरणा । तुरेहितो । तुरत्तो । तुरस्रो । तुरेउ ।[7] तुवादिपट्टे । तुवा। तुवाहि । तुवाहितो । तुवत्तो । तुवाओ। तुवाउ। एव तुमा । तुहा । तुब्भा[10]। तुम्हा । तुज्झा । इत्यादय प्रत्येक[11] पञ्चिदा स्यु[1] । इति पुनपुसकयोऽन्यशादेशै[12] सह ङसौ षटचत्वारिंशद्भिदा । स्त्रियां तु । तुरस्र। तुरेआ। तुरेए। तुरेए। तुरेहितो। तुरत्तो। तुरस्रो। तुरेउ।[14] तुवादिपट्टे। तुवाअ। तुवाआ। तुवाए। तुवाए। तुवा। तुवाहि । तुवाहितो । तुवत्तो । तुवाओ । तुवाउ। एव तुमाअ। तुहाअ। तुब्भाअ[15]। तुम्हाअ। तुज्झाअ। इत्यादय प्रत्येक[16] दश भिदा । इति टावभावपक्षे त्रिसप्तति[1] । टापि पञ्चपञ्चाशत्[18]। एताश्च भिदा प्रक्रिया वर्णेन प्रदर्शिता । यथादर्शन प्रयोज्यम्। न हि वचिरत्रिपर प्रयुज्यत इति हि भाष्यम्[19] । भ्यसि ।

He III, 98

उम्होय्हतुय्हतुब्भ[0] भ्यसि[1] ॥ १४ ॥

भ्यसि परे युष्मत् उम्ह उय्ह तुय्ह तुब्भ[22] इति षडादेशा भवन्ति । भ्यसस्तु यथाप्राप्तम्। तुब्भेत्यस्य[23] वा म्हज्झा[1]। उम्हासुतो। उम्हेसुतो[25]। उम्हाहि । उम्हेहि[3]। उम्हाहितो । उम्हेहितो । उम्हत्तो । उम्हाओ ।

---

[1] ४ 12 [2] IV 54 [3] IV, 21 [4] ४ 8 [5] IV 23 [6] IV 21 [7] ४ 7 [8] ४ 7 [9] 23 and 24 शादेशादेशौ च R [9] T adds wrongly एव तुआदेशेऽपि [10] तुहहा P and T, which places it after तुज्झा [11] R om this word [12] T om सु [13] x 11 [14] T adds again एव तुआदेशेऽपि [15] तुहहाअ R and T which places it after तुज्झाअ [16] R om this word [1] षटसप्तति T [1] अष्टपञ्चाशत् T [19] The *Siddhântal aumudi* तिङन्ते अदादय , before P3 iii 4 83 says —वच परिभाषणे। वक्ति। वक्त । अयमन्तिपरो न प्रयुज्यते [0] °तुब्भ Tri तुहह R and T [1] T om भ्यसि तुहह R and T [3] तुहहे° R and T [4] ४ 3 [5] R om this word [6] T places the e two words after उम्हाउ

उम्हाउ । एव उय्हासुतो । तुय्हासुतो । तुब्भासुतो[1] । तुम्हासुतो । तुज्झासुतो । इत्यादयो नव नव भिदा । आहत्य पुनपुसकयोश्चतुप्पञ्चाशत् भिदा । स्त्रियां तु टावभावे पूर्ववच्चतुप्पञ्चाशत् । टापि तु । उम्हासुतो । उम्हाहितो । उम्हत्तो । उम्हाओ । उम्हाउ । एव उय्हासुतो । तुय्हासुतो । तुब्भासुतो[3] । तुम्हासुतो । तुज्झासुतो । इत्यादय पञ्च पञ्च भिदा । आहत्य चिंशत् । ङी । ङिटाभ्यां तुमएतइतएतुमाइतुमे[4] इत्यादेशपञ्चके । तुमए । तइ । तए[5] । तुमाइ । तुमे । तुतुर् ङिम्ङसाविति[6] तु तुआदेशे ङेमिरिति[7] मिरि । तुम्मि । तुव तुम तुह तुब्भ[8] तुम्ह तुज्झ[9] इत्यादेशपञ्चे[10] । ङेरित्यस्मिन्मि[11] । अनिदमेतदस्तु कियत्तदस्स्त्रिया च हि[12] । ङेर्डे[13] । इत्यादेशेषु । तुवत्थ । तुवम्मि । तुवम्मि । तुवहि । तुवे । एव तुमत्थ । तुहत्थ । तुब्भत्थ[14] । तुम्हत्थ । तुज्झत्थ । इत्यादय पञ्च पञ्च भिदा । आहत्य पुन पुंसकयोरेकचिंशद्भिदा[15] । ङ्यन्तादेशे[16] सह षट्त्रिंशत् । स्त्रियां तु न मिरादेशो[17] ङेरित्यस्मिन्मि इत्यादेशपञ्चक[18] च । तुअ । तुआ । तुइ । तुए । तुवाअ । तुवाआ । तुवाइ । तुवाए । एव तुमाअ । तुहाअ । तुब्भाअ[19] । तुम्हाअ । तुज्झाअ । इत्यादयश्चतस्रश्चतस्रो भिदा । आहत्य टावभाव पक्षे[20] अष्टाविंशति । ङ्यन्तादेशे[21] सह चत्वारिंशत् । टापि । तुवादिपञ्चे[22] तिस्रस्तिस्रो भिदा । ङादेशे[23] चतस्र । इति ङ्यन्तादेशे सह[24] सप्तत्रिंशति । सुपि । तुतुर्[25] ङिम्ङसाविति[26] ङादेशे तुवादिपञ्चे च[27] क्वासुपोरिति[28] बिन्दुविकल्पे । तुम्हु । तुम्हु । तुवेसु । तुवेसु । इत्यादयो लिङ्गपक्षेऽपि चतुर्दश भिदा । भ्यसि ङिपि च पुनपुसकवत् ॥

इति युष्मदशब्दविभाग ॥

---

[1] तुहहा* R and T [2] T om this word [3] तुहहा* R and T [4] *तुरतुए R and T x 7 [5] तुइ । तुए P and T [6] x, 12 [7] x, 10 [8] तुहह R and T [9] P om these two words [10] x, 13 [11] x 15 [12] x 30 [13] x 31 [14] तुहहत्थ P and T [15] *भेदा T [16] ङाभा* P and T, x 7 [17] x, 30 [18] See notes 11–13 [19] तुहहाअ R and T See the commentary on x 13 [20] x, 7 [21] तुहहादि* R, x 13 [22] x, 12 [23] R om these two words x, 7 R and T om तुइ x 12 x 11 [24] x, 14

Fifteenth Section

अथास्मदादेरुत्तरे प्रत्यये ।

सौ ।

H8 III 103 अम्हत्तुमा अम्हिहमहअमहम्मयम्मि[1] ॥ १ ॥

अस्मत्तुमा सह अम्हादि षट्कमापद्यते । अम्हि । हि । महअ । अहं । अहम्मि । अम्मि । अमि ।

H8 III 104 भोभेवश्च जसा ॥ २ ॥

अस्मज्जसा सह भो मे वश्च इति चोनादेशाज्ञापद्यते[4] ।

H8 III 105 अम्हेअम्होअम्ह ॥ ३ ॥

अस्मज्जसा सह अम्हे अम्हो अम्ह इति चापद्यते । योगविभाग उत्तरार्थ । भो । मे[5] । वअ[6] । अम्हे । अम्हो । अम्ह ।

H8 III 107 मणेणमिमिममममम्मिअहअम्हमम्ह अमा ॥ ४ ॥

अस्मदमा सह म णे इत्यादि दशकमापद्यते । म । णे । मा । मि । मिम[7] । मम[8] । अम्मि । अह । अम्ह । मम्ह । अमि ।

H8 III 108 णे च शसा ॥ ५ ॥

शसा सहास्मत णे इति चकारात अम्हे अम्हो अम्ह इति [9] चापद्यते । णे । अम्हे । अम्हो । अम्ह । तृतीयैकवचने ।

H8 III 109 115 मिमइममाइमएमे डिटा ॥ ६ ॥

अस्मत् डिवचनेन टावचनेन च सह मोत्यादि षट्कमापद्यते । मि । मइ । ममाइ । मए । मे ।

---

[1] म्मि or मि for अहम्मि Tri [2] •भे• Tri[1] and Tri[3] •हे• Tri[2] P and T •वअ Tri •वय R and T [5] हे वय L and T [4] R om आदेशात् [6] हे P and I [6] वय T मिँ for मिम T, मम for मम Tri[1] and T म R •मम्हअम्ह Tri [8] मिँ T [9] मम R and T [10] xi .

ममणेमञ्चाइममए[1] टा ॥ ७ ॥ He iii

अस्माट्टावचनेन सह मम णे मञ्चाद[1] ममए इति चतुर आदेशानापद्यते। मम। णे। मञ्चाद[1]। ममए। भिसि।

णेअम्हेह्यम्हाह्यम्हेअम्ह भिसा ॥ ८ ॥ He iii,

अस्मात् भिसा सह णे इत्यादि पञ्चकमापद्यते। णे। अम्हेहि। अम्हाहि। अम्हे। अम्ह। ङसि।

अम्हमञ्झमञ्झमइमहमहमे च ङसा ॥ ९ ॥ He iii,

अस्मात् ङसा सह अम्ह इत्यादि सप्तक चकाराद्म्हममी चापद्यते[3]। अम्ह। मज्झ। मज्झ[4]। मइ। मह। मह। मे। अम्ह। मम। आमि।

अम्हेअम्होअम्हाणममाणमहाणमज्झाणमज्झाम्हा-म्हणेणो आमा ॥ १० ॥ He iii,

अस्मादामा सह अम्हे इत्यादेकादशकमापद्यते[5]। क्वासुपोरिति[6] विन्दुविकल्प। अम्हे। अम्हो। अम्हाण। अम्हाण। ममाण। ममाण। महाण। महाण। मज्झाण। मज्झाण। मज्झ। अम्ह। अम्ह। णे। णो। इति पञ्चदश। ङसौ।

मइममम्हमज्झ ङसौ ॥ ११ ॥ He iii,

अस्मात् ङसौ परतो मइ इत्यादि चतुष्कमापद्यते। ङसेषु यथाप्राप्तम्। तत्र ममादिवयादुत्तरस्य ङसे हितो इत्यादादेशपट्के अष्टादश भेदा। मइ इत्यस्मादुत्तरस्य तु हिंतो इत्यादिचतुष्के[8] नुनपोति[9] णोआदेशे पञ्च भेदा। मइणो। मईहिंतो। मइत्तो। मईओ। मइउ। ममा। ममाहि। ममाहिंतो। ममत्तो। ममाओ। ममाउ। एव महा। मज्झा। इत्यादय षट् षट भिदा। इति पुनपुसकयोस्त्रयोविंशति। स्त्रियां तु मइ इत्यादेशादुत्तरस्य शादि चतुष्क[10] हितो इत्यादि चतुष्क[11] च। ममायुक्त रस्य तु पूर्ववदष्टक सप्तक वा[12]। मइअ। मईआ। मईइ। मईए।

---

[1] मञ्चाद् Tri, ममाद् R and I [2] °मज्झा° for °मज्झ° T
[3] xi 12 [4] मज्झा T [5] इत्येकादश° T [6] iv 11
[7] इत्यादेश° T, iv, 21-24 [8] इत्यादेशचतुष्के T iv 21 [9] iv, 64
[10] i, 8 [11] iv, 21 [12] See the commentary on x 13

मईहितो। मइत्तो। मईओ। मईउ। ममाअ। ममाआ। ममाए। ममा। ममाहि। ममाहितो। ममत्तो। ममाओ। ममाउ। एव महाअ। मज्झाअ। इत्यादि। आहत्याष्टचित्वारिंशद्भेदा भवन्ति।

He III 112

अम्हमम भ्यसि ॥ १२ ॥

भ्यसि परे अस्मत् अम्ह मम इत्येतावादेशौ भवतः। भ्यसस्तु यथाप्राप्तम्। तत्र मुतो इत्यादादेशेषु[1]। अम्हामुतो। अम्हेसुतो। ममामुतो। ममेसुतो। इत्यादिनवभेदा। आहत्य पुनपुंसकयो स्त्रियां टाबभावपक्षे[2] चाष्टादश भेदा। टापि तु। अम्हामुतो। अम्हाहितो। अम्हत्तो। अम्हाओ। अम्हाउ। एव ममामुतो इत्यादिपक्षे। आहत्य दश भेदा। ङौ। सिमहममाहमण्मे ङिटित्यादेशपञ्चकम्[3]।

He III 116 117

अम्हममम ज्झमह ङिपि ॥ १३ ॥

ङिपि सप्तम्यां परतोऽस्मदम्हादि चतुष्कमादेशमापद्यते। ङिपो यथाप्राप्तम्। तत्र डेस्त्यस्मिन्मीत्यादादेशपञ्चके[4]। अम्हत्थ। अम्हम्मि। अम्हम्मि। अम्हहि। अम्हे। एव ममत्थ। मज्झत्थ। महत्थ। इत्यादय पञ्च पञ्च भेदा। आहत्य पुनपुंसकयोर्विंशतिः। ङ्यन्तादेशै[5] सह पञ्चविंशतिः। स्त्रियां तु। अम्हाअ। अम्हाआ। अम्हाए। अम्हाए। एव ममाअ। मज्झाअ। महाअ। इत्यादयश्चतस्रश्चतस्रो भिदा। आहत्य टाबभावपक्षे[6] षोडश। टापि द्वादश। ङ्यन्तादेशै सह एकविंशतिः सप्तदश वा भेदा। सुपि। अम्हममम ज्झमह ङिपीत्यम्हादिचतुष्के[8] विन्दुविकल्पे[9]। अम्हेसु। अम्हेसु। ममेसु। ममेसु। मज्झेसु। मज्झेसु। महेसु। महेसु। इत्यष्टौ भेदा[10]। भिस्भ्यस्सुपीत्येत्त्व[11] विकल्पेन केचिदिच्छन्ति। तत्रापि। अम्हसु। अम्हसु। इत्यादयोऽष्टौ भेदा। अम्हादेशे आत्त्वमपीच्छन्ति केचित। अम्हासु। अम्हासु। इति तदाहत्य पुनपुंसकयो स्त्रियां टाबभावे[12] चाष्टादश भेदा। टापि तु। अम्हासु। अम्हासु। इत्यादयोऽष्टौ भेदा ॥

अचाप्यलिङ्गत्वपक्षे ङसौ शोऽादेशाद्यभावात्[13] द्वाविंशतिर्भेदा। भ्यसि ङिपि च पुनपुंसकवत् ॥

इत्यस्मद्शब्दविभाग ॥

---

[1] IV, 27 [2] See the commentary on x 13 [3] XI, 6
[4] मीत्यादेश° T see p 13 notes 11–13 [5] XI, 6 [6] See the commentary on X, 13 [7] XI 6 [8] XI 13 [9] IV 14
[10] इत्यादयोऽष्टौ भिदा T [11] IV 16 [12] See the commentary on X, 13 [13] IV 54 see the commentary on XI 11

Twelfth Section

अथ प्रातिपदिकावस्थायामेव केषांचित्प्रकियाविशेष प्रदर्श्यते ॥

दर्शनम् । मनस्विनी । अतिमुक्तकम्[1] ।

शर्षेतप्रवज्रेष्वित्[2] ॥ १ ॥ He ii

शर्षे[3] इत्येतयोस्तप्ते वज्रे च सयुक्तस्यान्यहल प्राग्रित्त्व वा भवति । शीर्ष्णमिति[4] मन् । न इति[5] णत्वम् । दरिसण । पचे ।

स्वरेभ्यो वक्रादौ ॥ २ ॥ He i

वक्रादिषु यथादर्शन प्रथमादिभ्य स्वरेभ्य परो विन्दुर्भवति । रेफलोप[6] । दसण । तु समृद्धादावित्यात्त्वम् । वलोप[8] । द्वितीयस्वरात्प रतो विन्दुश्च[9] । माणसिणी ।

णो वातिमुक्तके ॥ ३ ॥ He i

अतिमुक्तके तवगस्य णत्व वा भवति ।

कामुकयमुनाचामुण्डातिमुक्तके मो डलुक् ॥ ४ ॥ He i

कामुकादिषु मकारस्य डानुबन्धो लुग्भवति । डित्त्वाच्चेष स्वर सानुनासिकोच्चार[10] । ककटड इति[11] सयुक्तककारस्य लुक् । प्रायो लुगित्यन्यककारस्य[12] लुक ।

यष्ट्युत्तिर[13] ॥ ५ ॥ He i

इति यष्ट्युत्तिलम्[13] । तृतीयस्वरात्परतो विन्दुश्च[14] । अणिउतअ । अइउतअ[15] । अणिउत्तअ[16] । अइमुत्तअ । इति च दृश्यते ॥

विआस । वलोवे[17] ।

---

[1] अतिमुक्त R and T [2] शर्षे° Tri शप° R and T [3] श ष R and T [4] IV 29 [5] IV 47 [6] IV 32 [7] VIII 8 [8] IV 32 लोप R [9] XII, 2 [10] II, 6 [11] IV 45 [12] IV, 26 [13] यष्ट्युत्ति° Tri [1] and Tri [2] यष्ट्युत्ति° Tri [3] R, and T [14] XII 2 [15] अइउत्तअ R [16] T om this word [17] IV 32

He i 43

शेर्लुप्तयवरशेर्दि ॥ ६ ॥

शषसानां लुप्तयवरशषसानामादे स्वरस्य दीर्घो भवति । संयोगे उपरधोवर्तमानानां यवरशषसानां लोपे सति योऽवशिष्टा शषसास्तेषा मादेरचो दीर्घो भवतीत्यर्थः । शेषादेशस्येति[1] द्वित्वे प्राप्ते ।

He ii 97

दीर्घान्न ॥ ७ ॥

लाक्षणिकादलाक्षणिकाच्च दीर्घात्परयो शेषादेशयोर्द्वित्व न भवति । षीसामो ॥

तीर्थम् । दुःखम् । दक्षिण[2] । दीर्घ ।

He ii 92 91

न वा तीर्थद् खदक्षिणदीर्घे ॥ ८ ॥

एषु संयुक्तस्य ह्रस्व न वा भवति ।

He i 104

तीर्थे ह्रूल्[3] ॥ ९ ॥

तीर्थे ईत ऊत्त्व भवति । हि[4] । हकारे सति । तूह । ह्रस्वाभावपक्षे[5] । तित्थ । दुह । ह्रस्वाभावे । कगटड इति[6] शिष्टामूष्मलोपे । दुक्ख ।

He i 45

हे दक्षिणेऽस्य ॥ १० ॥

दक्षिणशब्दस्यादेरक्षणस्य दीर्घो भवति । हे । चस्य हकारे सति । दाहिणो । पक्षे । च इति[7] खस्य द्वित्व च[8] । दक्खिणो ।

He ii 1 1

रो दीर्घात् ॥ ११ ॥

दीर्घशब्दात्स्वार्थे रो वा भवति । दीहरो । राभावे । दीहो ॥

स्वप्न ।

He ii 108

नात्स्वप्ने ॥ १२ ॥

स्वप्ने संयुक्तस्य नकारात्परागित्त्व भवति ।

He i 46

स्वप्नादाविल् ॥ १३ ॥

स्वप्नादिष्वादेरक्षणस्य इत्त्व भवति । सिक्खानित्यम्[10] । नवरामधेति[11] वलोप । पो व[12] ।

---

[1] IV 4 [2] ण R and T [3] ह्रूल T1 [4] T om हि [5] भावे P [6] IV, 45 XII, 6 [7] VIII 6 [8] IV, 4 [10] II, 4 [11] IV, 32 [12] IV 62

नीवीस्वप्ने वा ॥ १४ ॥ He i, 259

अनयोरस्य मो वा भवति । सिमिणो । सिविणो ॥

अभिज्ञ ।

ज्ञो जोऽविज्ञाने ॥ १५ ॥ He ii 83

ज्ञामवन्यिनो अकारस्य लुग्वा भवति । विज्ञानशब्दे[1] न भवति । खघथधभामिति[2] हत्वम् । शेषादेशस्येति[3] जकारस्य द्वित्वम् । अहिज्जो । लुगभावपक्षे ।

ज्ञस्नो ॥ १६ ॥ He ii 42

ञ स्न इत्येतयोर्णत्व भवति ।

ज्ञो णोऽभिज्ञादौ ॥ १७ ॥ He i, 56.

अभिज्ञादिषु[4] ज्ञकारादेशस्य णस्यावर्णस्य उत्त्व भवति । अहिणू । ण इति किम् । अहिज्जो । अभिज्ञादाविति किम् । प्राज्ञ । पण्णो । पज्जो ॥

द्वारम् ।

उत्करवल्लीद्वारमात्वच ॥ १८ ॥ He i 58, 79, 81

उत्करवल्लीद्वारशब्देषु मात्वच्प्रत्यये च आदेरवर्णस्य एत्त्व तु[5] भवति ।

द्वोर्द्वारे ॥ १९ ॥ He i 79

द्वारे दकारवकारयो प्रयायेण लुग्भवति ।

वा च्छद्मपद्ममूर्खद्वारे ॥ २० ॥ He ii 112

एषु स्वोरन्त्यस्य हल[6] मागुत्त्व वा भवति । दार । वार । दुवार ॥

आर्द्रम् ।

वार्द्रे उदोत् ॥ २१ ॥ He i 82.

आर्द्रशब्दे आदेरवर्णस्य उत्त्वमोत्त्व च वा भवत ।

---

[1] विज्ञाशब्दे R and T [2] VI 4 [3] II, 4 [4] °आदौ T [5] II, 3 [6] I 8 °रन्त्यहल R

लो नार्द्रे ॥ २२ ॥

आर्द्रे लोप्तल[1] वा भवति। लो ऊ इति[2] ऊकारः। उऊढं। ओऊढं। ऊढं। ओढं। वह। ओहे। वहे॥

गव्या।

Hē i 5 — **गव्यादौ ॥ २३ ॥**

गव्यादिष्वादेरवर्णस्य एत्त्व भवति।

Hē ii 24 — **द्यय्यर्यां ज्ज ॥ २४ ॥**

द्य य र्य इत्येतेषां अकारो भवति। संयोग इति[3] सत्वेन हस्व। सेज्जा॥

उत्पात।

Hē i 67 — **न वाद्ययोत्खातादौ ॥ २५ ॥**

अद्ययेपूत्खातादिषु च आदेरातो[4] हस्वो न वा भवति। पूर्वमुपरि वमयुज इति[5] दिर्लोप अकार। उक्कायो। उव्वायो॥

प्रस्ताव।

Hē i. 45 — **स्त ॥ २६ ॥**

सकारस्य थो भवति।

Hē i, 68 — **घञि वा ॥ २७ ॥**

घञनिमित्तस्यादिभूतस्याकारस्य[6] हस्वो वा भवति। पत्थो। पत्तावो। क्वचिन्न भवति। राग। रागो॥

पानीयम्।

Hē i 101 — **वा पानीयगे ॥ २८ ॥**

पानीयादिष्वादेरीकारस्य ह्रस्व वा भवति। पाणिअ। पाणीअ॥

युधिष्ठिर।

---

[1] i 8 [2] iv 63 [3] iv, 25 [4] आदेरतो R and T
[5] iv 6 [6] Pā iii 3 27

उ युधिष्ठिरे[1] ॥ २९ ॥ He i 96

युधिष्ठिरे आदेरित उत्त्व वा भवति ।

मुकुलादौ ॥ ३० ॥ He i 107

मुकुलादिष्वादेरुकारस्य अद्भवति । खघथधभामिति[2] हत्वम् । कगटडेति[3] पकारलोप ।

हरिद्रादौ ॥ ३१ ॥ He i 254

हरिद्रादिषु रस्य लत्व भवति। गुरुट्ठिओ। जन्नट्ठिओ। गुहिट्ठिओ ॥
उच्छ्वास । उत्सव ।

दोदोऽनुत्साहोत्सन्न[4] ऊ शसि ॥ ३२ ॥ He i 114

ग्रकारभकारयो परयोरुदित्युपसगस्य दकारेण सह ऊत्त्व भवति ।
उत्साहोत्सन्नशब्दौ वर्जयित्वा । ऊसासो । ऊसवो ॥
पुष्करम् ।

ष्कस्कोर्नाग्नि ॥ ३३ ॥ He. ii, 4

ष्क स्क इत्येतयोर्नाग्नि सज्ञायां खो भवति ।

स्तौ ॥ ३४ ॥ He i 116

सयुक्ते परे आदेरुत ओत्त्व भवति । पोक्खर ॥
बृहस्पति ।

तु बृहस्पतौ ॥ ३५ ॥ He i, 138

बृहस्पतौ ऋत रदुतौ तु[5] भवत ।

भ्यौ[6] बृहस्पतौ तु वही ॥ ३६ ॥ He ii 137

बृहस्पतौ चकारहकारयोर्यथासख्य भकारयकारौ तु[5] भवत ।

श्लेष्मबृहस्पतौ तु फो ॥ ३७ ॥ He ii 55

अनयो फोर्द्वितीयस्य सयुक्तस्य[8] फो भवति तु[5] ।

---

[1] उयुधि° Tri [1] [2] vi 4 [3] iv 45 [4] दोदोः Tri उदोदोः R and T [5] ii 3 [6] Thus Tri [5] ह्यौ all other MSS [7] हकार° R and T [8] T om this word

He II 69

सो वृहस्पतिवनस्पत्यो ॥ ३८ ॥

अनयो मयुक्तस्य सकारस्तु[1] भवति। विहप्फई। वुहप्फई। वहप्फई। विहस्सई। वुहस्सई। वहस्सई। भअप्फई[2]। भअस्सई[2]। आदेशाभावे कगटडेति[3] सलोप। विहप्पइ। वुहप्पई। भअप्पई[2]। महप्पई। इति द्वादश भिदा ॥

आदृत।

He I 143

दिरादृते[4] ॥ ३९ ॥

आदृते ऋतो दिरादेशो भवति। कगटडेति[3] दलोप। दीर्घानेति[5] द्वित्वप्रतिषेध। आदिओ ॥

दृप्त।

He I 144

दृप्तेऽरि. प्पा ॥ ४० ॥

दृप्ते ऋत पकारतकाराभ्यां सह अरि इत्यादेशो भवति। दरिओ ॥

ऋद्धि।

He I 140

केवलस्य रि[6] ॥ ४१ ॥

केवलस्य व्यञ्जनेनासपृक्तस्य ऋतो रिर्भवति। रिद्धी ॥

सदृश। सदृच। सदृक।

He I 142

दृशि टक्सक्क्षिपि[7] ॥ ४२ ॥

टक सक[8] क्षिप इत्येतदन्ते दृशि धातौ ऋतो रित्व भवति। पूर्वव्याकरणप्रक्रियया[9] टक सक[1] क्षिपिति व्यवहार। अह इति[10] निषेधात् द्वित्वाभाव। सरिसो। सदृशादिलाक्षत्वम्[11]। सरिच्छो। अत्यलोप[12]। सरी ॥

युष्मादृश।

He I 246

अर्थपरे तो युष्मदि ॥ ४३ ॥

अर्थपरे युष्मच्छब्दे यस्य तकारो भवति।

II 3 [2] हअ° R and T [3] IV 45 [4] द्वि आदृते R [5] IV, 45 [6] VII 7 रि Tri [7] T om this Sūtra [8] स for सक R and T °क्षिनि Tri and Tri—See Pischel on He I 142 [9] स I and T [10] प्रतीत्या T [11] स R and T [12] IV 1 [13] IV 2 [14] VII 2

श्मष्मस्सह्लामस्सरश्मौ म्ह ॥ ४४ ॥ He² ii 74

श्म ष्म स्स ह्ल इत्येतेषां म्ह इत्यादेशो भवति। स्सरश्मिशब्दयोन भवति। तुम्हारिसो ॥

दैत्य ।

दैत्यादौ ॥ ४५ ॥ He i, 151

दैत्यादिष्वादेरच अइ इत्यादेशो भवति।

त्योऽचैत्ये ॥ ४६ ॥ He ii 13

चैत्यवर्जिते त्यस्य चो भवति। दच्चो ॥

धैर्यम्।

ई धैर्ये ॥ ४७ ॥ He i 153

धैर्ये एच इत्त्व भवति।

धैर्ये र ॥ ४८ ॥ He ii 64

धैर्ये र्यस्य रो वा भवति। धीर। चय्यर्या ज इति[1] जत्वम्। धिज्ज ॥

चयोदश। अष्टादश। चयोविंशति ।

एत्साञ्झला चयोदशगेऽच ॥ ४९ ॥ He i 165

चयोदशादिष्वादेरच साच्चेन परेण हला सह एत्त्व भवति।

रल् सप्तत्यादौ ॥ ५० ॥ He i 210

सप्तत्यादौ तवर्गस्य रत्व भवति। जिस्वात्रित्यम्[2]।

प्रत्यूषदिवसदशपाषाणे तु ह ॥ ५१ ॥ He i, 262 263 ii 14

प्रत्यूषादिषु श्रूयमाणो हकारस्तु[3] भवति। तेरह[4]। तेरस।

ष्ट ॥ ५२ ॥ He ii 34

ष्टस्य ठो भवति। अट्ठारह। अट्ठारस।

---

[1] xii 24 [2] ii 4 [3] ii 3 [4] तेरहो R and P

Hs I 55 वा.

विंशतिषु त्या घोपत् ॥ ५३ ॥

विंशतिप्रकारेषु तिं इत्ययमादेश आदि विन्दो त्रिंशित्[1] क्रोपो भवति। त्रिंशात्पूर्वस्य दीर्घः[2]। चटलसात् टाप्[3]। तिंशीया ॥

स्फटिके ।

Hs I 18*

स्फटिके[4] ॥ ५४ ॥

स्फटिके इत्यस्य को[5] भवति ।

Hs I 180

निकषस्फटिकचिकुरेषु ह ॥ ५५ ॥

एषु इत्यस्य हस भवति । कढिहो ॥

भट ।

Hs I, 195

टो ट ॥ ५६ ॥

ऋषवृक्षात्मादो स्थितस्यात्र परस्य टकारस्य टस्तं भवति । भरो ॥

पयदय । पयागत । दृष्ट ।

Hs II 43

पञ्चदशदत्तपञ्चाशति णः ॥ ५७ ॥

एषु णोणकारो[7] भवति । पणरम । अट्ठणोय[8] । पणामा । स्वप्नादाविलितोक्त्वम्[9] । दिण्णा ॥

मन्मथ ।

Hs I 214

मन्मथे ॥ ५८ ॥

मन्मथे आदेमस्य णो भवति ।

Hs II 61

न्मो म ॥ ५९ ॥

अस्य मो भवति । वम्महो ॥

ललाटम् ।

Hs I 257

लो ललाटे च ॥ ६० ॥

ललाटे आदेर्लकारस्य णो भवति ।

---

[1] II 4 [2] II 6 [3] P. IV, I 1 [4] R and T on this Sūtra (Tri. I 3 20) [5] को R and T [6] दत्त R and T I 8 [7] T om this word VII 2 [8] XII 13

पक्काङ्गारललाटे तु ॥ ६१ ॥ He I 47

एत्वादेरस्य इत्वं तु[1] भवति। टो ड इति डलम्।

ललाटे डलो [2] ॥ ६२ ॥ He ii 123

ललाटे डनयोर्बहुलं[4] भवति। णिडाऊ। णडाऊं॥

स्थूल [5]।

स्थूले रलूनश्चौत् ॥ ६३ ॥ He i 124 255

स्थूले लस्य लिद्रत्वं[6] भवति। तत्सनियोगेन च स्थस्य थोत्वं भवति। थोरो॥

स्नुषा।

स्नुषाया णह फो ॥ ६४ ॥ He i 261

स्नुषाशब्दे फोद्वितीयस्य णो [8] णह इत्यादेशस्तु[9] भवति। मनयामिति[10] नकारलोप। सुण्हा। सुसा॥

विन्ध्य। याह्यम्।

ध्यह्योर्झल् ॥ ६५ ॥ He ii 26

ध्य ह्य इत्येतयोर्झित्[11] झस्य भवति। हलि ङञणनामिति[1] विन्दु। वर्गेऽन्त्य इति ञलम्[13]। विञ्झो[14]। पक्षे विन्दुरेव। विन्झो[15]॥

यतुलम्।

तस्याधूर्तादौ ट ॥ ६६ ॥ He ii, 30

तस्य टो भवति। धूर्तादौ न। वट्टुओ। अधूर्तादाविति किम्। धुत्तो॥

मन्यु। चिह्नम्।

---

[1] ii 3 [2] xii, 56 [3] डमो Tri डलओ R and T
[4] डऊघो• R and T [5] खूण R and T [6] ii 4
[7] •सां Tri, •सा R and T [8] i 4 [9] ii 3 [10] iv, 48
[11] ii 4 [1] vi, 5 [13] vi 6 ञ्यादाविलस्य R and T
[14] वञ्झो I and T [15] The Prākrit form of याह्यम् is missing

वा न्तर्म्भो मन्युचिह्नयो ॥ ६७ ॥

अनयोर्यथासंख्यं सयुक्तयो[1] न्त म्भ इत्येतौ वा भवत । मन्तू । मन्तु । चिध । चिन्ध । वाङ्मनकादाटेरपि चकारस्य प्रायो भूमिति भुक्ति । इध । पधे । अप्पणहत्थणा[2] एह इति[3] एहादेश । चिण्ह ॥

पुष्पम । स्पन्दनम् ।

प्पस्पो फ ॥ ६८ ॥

प्प स्प इत्येतयो फो भवति । पुप्फं । फन्दण ॥

ब्रह्मचर्यम् । आचार्य । सौन्दर्यम् ।

स्याद्यचैत्यचौर्यसमे यात् ॥ ६९ ॥

स्यात् भव्य चैत्य इत्येतेषु चौर्यसमेषु च सयुक्तस्य यकारात्परागित्त्व भवति । धम्मम्मल्लामिति[4] म्हादेश । बम्हचरिअ ।

गौण्डागे[5] ॥ ७० ॥

गौण्डादिभ्यादेरेच[6] उत्त्व भवति । मुदरिअ ।

डेरो ब्रह्मचर्यसौन्दर्ये च ॥ ७१ ॥

ब्रह्मचर्यसौन्दर्ययोश्चकारादाश्चर्ये च र्यस्य डिदेर[7] इति भवति । बम्हचेर । मुदेर ।

आचार्ये चो हृस्व ॥ ७२ ॥

आचार्ये चकारसबन्धिन आतो ह्रस्वो भवति । चकारादित्त्व च । आअरिओ । आइरिओ ॥

पर्यन्त ।

वा पर्यन्ते ॥ ७३ ॥

पर्यन्ते यस्य डेरो वा भवति । पेरन्तो । पज्जन्तो । यय्यया ज[8] । पज्जतो ॥

आश्चर्यम् ।

---

[1] T om this word [2] R and T om ह [3] v, 1 [4] xii 44 [5] Thus Tri [6] गौण्डागेषु Tri[1] and Tri गौण्डागेदिषु R and T T adds च [7] डेरच T [8] iv 7 [9] xii 24

अरीअरिज्जमार्ष्ये[1] ॥ ७४ ॥ H.

